# संस्कृत वार्ता:

दिनाङ्क : 16/05/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना कथितं यत्, वैश्विक समाह्वानान् निवारणाय विश्वसनीयस्य भविष्यस्य कृते सज्जायाः च आपूर्तिशृङ्खलायाः निर्माणार्थं भारत-नीदरलैंडस्-देशौ सहभागित्वम् कुर्वन्तौ स्तः, भारतं अवसराणां भूमीति वर्णितम्।
- सेनाध्यक्षेण जनरल उपेन्द्र द्विवेदिना पाकिस्तानं भयोत्पादकेभ्यः आश्रयं दातुं, भारतस्य विरुद्धं कार्याचरणाय च सावधानम् कृतम्।
- पश्चिमबङ्ग-सर्वकारेण एकादशाधिक द्विसहस्रतम वर्षात् प्रदीयमानानां जाति-प्रमाणपत्राणां पुनः सत्यापनं कर्तुम् आज्ञापितम्।
- सी. बी. एस. ई. इत्यनेन द्वादशी कक्षायाः छात्राणां कृते उत्तरपत्राणां द्विस्तरीय-पुनर्मूल्याङ्कनप्रक्रिया घोषिता।
- थाईलैण्ड्-ओपन्-बैडमिण्टन्-क्रीडायां, अद्य बैंकॉक-नगरे उपांत्यचक्रीय-क्रीडायां मलेशिया-देशस्य युगलं पराजित्य, सात्विक साईं राज-रङ्किरेड्डी तथा चिराग्-शेट्टी च इत्येतयोः भारतीयपुरुषयुगलं अन्तिम-स्पर्धायां प्रविष्टम्।

---

<u>भारत-नीदरलैंड्स्</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य अवदत् यत् भारत-नीदरलैंड्स्-देशौ विश्वव्यापि-समाह्वानानां निवारणाय विश्वसनीयं, पारदर्शकं, भविष्यस्य कृते आपूर्तिशृङ्खलायाः निर्माणार्थं मिलित्वा कार्यं कुर्वन्तौ स्तः, यत् सः बहुविधसङ्कटैः ग्रस्तं आपद्-दशकम् इति वर्णितवान्। नीदरलैण्ड्-देशस्य हेग्-नगरे स्वस्य पञ्चदेशानां यात्रायाः क्रमे सामुदायिक-कार्यक्रमं सम्बोधयन् प्रधानमन्त्री श्रीमोदी अवदत् यत् विश्वं कोविड्-19 महामार्या, वर्तमान-संघर्षेण, उद्भूत-ऊर्जा-सङ्कटं चेत्यादीनां अभूतपूर्वप्रतिसन्धिं सम्मुखीकरोति।

सः सावधानम् अकरोत् यत् एतेषां समाह्वानानां द्रुतगत्या निराकरणे विफलतया वैश्विकविकासलाभः व्यतिक्रमितः भविष्यति तथा च जनसङ्ख्यायाः विशालः भागः निर्धनतायां निमग्नः भविष्यति। आर्थिक-स्थिति व्यवस्थायाः सुदृढीकरणाय वैश्विकप्रयासान् प्रकाशयन् प्रधानमन्त्री अवदत् यत् भारत-नीदरलैंड्स्-देशौ संयुक्तरूपेण सुदृढ-आपूर्तिशृङ्खलायाः निर्माणे केन्द्रितौ स्तः। प्रधानमन्त्री नरेन्द्रमोदी नीदरलैण्डदेशस्य प्रधानमन्त्रिणा रॉब् जेटेन इत्यनेन सह द्विपक्षीयवार्तां करिष्यति। सः अद्य मध्यान्हे हेग-नगरे राजा विलियम-अलेक्जेण्डर तथा महारानी मैक्सिमा इत्येताभ्यां सह मिलितवान्। एषा यात्रा द्विपक्षीयसम्बन्धेभ्यः अधिकमहत्त्वपूर्णा अस्ति । सम्प्रति सम्पन्नस्य भारत-यूरोपीय-मुक्तव्यापार-संधेः अनन्तरं भारत-यूरोपीय-सम्बन्धानां व्यापकविस्तारस्य अपेक्षा अस्ति। नीदरलैण्डदेशस्य यात्रायाः अनन्तरं प्रधानमन्त्री श्री मोदी श्वः स्वस्य यात्रायाः तृतीयचरणस्य अन्तर्गतं स्वीडेनदेशस्य यात्रां करिष्यति।

---------------------------------------------------

## सिक्किम स्थापनादिवस

सिक्किमराज्यस्य स्थापनादिवसे प्रधानमन्त्रिणा नरेन्द्रमोदिना सिक्किमराज्यस्य जनानां कृते शुभाशयाः प्रेषितम्। सामाजिकान्तर्जालीये पटले श्रीमोदीः अवदत् यत्, भारतस्य विकासे सिक्किम्-राज्यस्य योगदानं अत्यन्तं महत्वपूर्णम् अस्ति। अस्मिन् वर्षे उत्सवाः विशेषतया महत्त्वपूर्णाः सन्ति यतः राज्ये पञ्चाशत्तमः राज्यत्वदिवसः आचर्यते इति सः अवोचत्।

---------------------------------------------------

## प्रधानमन्त्री - इराक्

प्रधानमन्त्री नरेन्द्रमोदी इराक् देशस्य प्रधानमन्त्री पदस्य कार्यभार-ग्रहणाय अली फलीह कदीम अल-जैदी इत्यस्मै अभिनन्दिवान्। सामाजिकान्तर्जालीये पटले श्रीमोदी अवदत् यत्, इराक-देशेन सह दीर्घकालिक-मैत्रीपूर्ण-सम्बन्धान्भारतम् अत्यन्तं महत्त्वं ददति तथा च सर्वेषु क्षेत्रेषु द्वैपाक्षिक-सम्बन्धान् इतोप्यधिकं सुदृढीकर्तुं दृढतया प्रतिबद्धः अस्ति। उभयोः राष्ट्रयोः संयुक्तप्रगत्यै समृद्ध्यै च संयुक्तरूपेण कार्यं कर्तुं उत्सुकः अस्मि इति प्रधानमन्त्री अवदत्।

---------------------------------------------------

## उपेंद्र द्विवेदी

सेनाध्यक्षेण जनरल उपेन्द्र द्विवेदिना पाकिस्तानं भयोत्पादकेभ्यः आश्रयं दातुं, भारतस्य विरुद्धं कार्याचरणाय च सावधानम् कृतम्। नवदिल्ल्यां आयोजिते "सेना संवाद" कार्यक्रमे भाषमाणः श्रीद्विवेदी अवदत् यत् यदि पाकिस्तानः भारतस्य विरुद्धम् एतादृशाः गतिविधयः निरन्तरं करोति, तर्हि तेन एतत् निश्चयं कर्तव्यं यत् सः भूगोलस्य भागः भवितुम् इच्छति उत वा इतिहासस्य।

---------------------------------------------------

## पश्चिम बंगाल

पश्चिम बंगाल प्रशासनेन सर्वेषां जातिप्रमाणपत्राणां पुनः सत्यापनस्य आदेश: प्रदत्तः । एकादशाधिक द्विसहस्रतमवर्षात् निर्गतानां प्रमाणपत्राणां विषये अधिकारिणः उक्तवन्त: यत् गतचतुर्दशवर्षेषु एतेषां प्रमाणपत्राणां प्रामाणिकतायाः वैधतायाः च विषये प्रश्नाः उत्थापिताः सन्ति। शासकीय-अभिलेखानुसारम् उक्तकालावधौ अनुसूचितजातीनां, अनुसूचितजनजातीनां तथा अन्यपश्चवर्ती वर्गाणां कृते प्रायः एकोनसप्ततिलक्षाधिकैकशतकोटि जातिप्रमाणपत्राणि निर्गतानि सन्ति। अधुना उपजनपदाधिकारीणः जनपदस्तरीय-अधिकारीणश्च प्रत्येकं प्रमाणपत्रं सूक्ष्मतया परीक्षणं करिष्यन्ति। यदि किमपि प्रमाणपत्रं मिथ्यासूचनया अथवा अनियमिततायाः आधारेण निर्गतम् इति ज्ञायते, तर्हि तत् विधेः अन्तर्गतं निरस्तं करिष्यते। एषः निर्देशः तेषामपि नाम्नानां विषये प्रवर्तते येषां नामानि अद्यावधौ मतदातृ-सूच्याः विशेषसंशोधनस्य समये निष्कासितानि आसन्। तेषां आश्रितानां जातिप्रमाणपत्राणां समीक्षा भविष्यति तथा आवश्यकता चेत् तानि अपि निरस्तानि करिष्यन्ते।

---------------------------------------------------

## सी. बी. एस्. ई.- परिणामानन्तर सुविधाः

केन्द्रीय-माध्यमिक-शिक्षा-परिषद सी. बी. एस्. ई. इत्ययम् अवदत् यत् ये छात्राः स्वस्य परिणामैः असन्तुष्टाः सन्ति ते संरचित-समीक्षा-व्यवस्थां प्राप्तुं शक्नुवन्ति या हि द्वि-चरणीय-

समीक्षा प्रक्रिया अस्ति। प्रथमचरणे छात्राः स्वमूल्यांकितानां उत्तरपुस्तिकानां स्कैन इति प्रतिविम्बित-प्रतयः याचयितुं शक्नुवन्ति। एताः अन्तर्जालीय-माध्यमेन उपलभ्यन्ते। द्वितीयचरणे छात्राः विसङ्गतानां प्रश्नोत्तराणां सत्यापनाय आवेदनं कर्तुं शक्नुवन्ति उत वा अङ्कन-योजनायाः आधारेण विशिष्टानां उत्तराणां पुनर्मूल्याङ्कनार्थं याचनां कर्तुं शक्नुवन्ति।

सी.बी.एस्.ई. इत्यनेन सूचितं यत् छात्राः अस्य मासस्य नवदश दिनाङ्कात् द्वाविंशतिः दिनाङ्कपर्यन्तं प्रतिविषयाय सप्तशतरूप्यकाणां शुल्केन मूल्यांकितानां उत्तरपुस्तिकानां प्रतिविम्बितप्रतिलिपिं प्राप्तुं अन्तर्जालीय-माध्यमेन आवेदनं कर्तुं शक्नुवन्ति।

---------------------------------------------------

**ऋतु विभागेन**

भारतीय ऋतु विज्ञान विभागेन आगामि-दिन-द्वयोः अण्डमान-निकोबार-द्वीपसमूहेषु, उपहिमालयीय-पश्चिमबङ्गे, सिक्किम-राज्ये, असमे, मेघालये तथा दक्षिणकर्नाटके अतिवृष्टेः पूर्वानुमानं कृतम्। अनेन विभागानुसारेण श्वः अरुणाचलप्रदेश, केरल, माहे, तमिळनाडु, पुदुच्चेरी तथा कराईकल चेत्येतेषु क्षेत्रेषु अपि एतादृशी एव स्थितिः भविष्यति। विभागेन उक्तं यत् बिहार-राज्ये, आन्ध्रप्रदेशे, छत्तीसगढ-राज्ये, पूर्वीराजस्थाने, झारखण्डे, लक्षद्वीपे, मध्यमहाराष्ट्रे, मराठवाडायां जम्मू-कश्मीर-प्रदेशे, लद्दाखे तथा देशस्य उत्तरपूर्वीयभागेषु च अद्य गर्जनेन, तीव्रवातैश्च सह झञ्झावातस्य सम्भावना विद्यते। विभागेन झारखण्डे, मध्यप्रदेशे तथा राजस्थानस्य केषुचित् स्थानेषु उष्णतरङ्गस्य स्थितेः अपि घोषणा कृता।

---------------------------------------------------

**बैडमिंटन**

थाईलैण्ड्-ओपन्-बैडमिण्टन्-क्रीडायां, अद्य बैंकाक-नगरे उपांत्यचक्रीय-क्रीडायां मलेशिया-देशस्य गोह्-से-फेई तथा नूर्-इज्जुद्दीन् इत्यमुं च पराजित्य, सात्विक साईं राज-रङ्किरेड्डी तथा चिराग्-शेट्टी इत्येतयोः भारतीयपुरुषयुगलं अन्तिम-स्पर्धायां प्रविष्टम्।

---------------------------------------------------

## आई. पी. एल. क्रिकेटक्रीडा

आई. पी. एल. क्रिकेटक्रीडायां अद्य आतिथेय-कोलकाता-नाईट्-रायडर्स् इतीदं दलम् ईडन्-गार्डन्स् इत्यत्र गुजरात्-टायटन्स् इत्यनेन सह क्रीडिष्यति। क्रीडायाः आरम्भः सायं सार्ध सप्तवादने भविष्यति।

गतरात्रौ लखनऊ-नगरस्य एकाना-क्रीडाङ्गणे लखनऊ-सूपर्-जायण्ट्स इति दलेन चेन्नई-सुपर्-किङ्ग्स् इति दलं सप्तस्तोभैः पराजितम्। सी.एस्.के. इत्यनेन प्रदत्तस्य अष्टाशीत्यधिकैकशतधावनाङ्कस्य लक्ष्यम् आतिथेयेन एल. एस. जीति दलेन सप्तदशैवक्षेपणचक्रेषु सम्प्राप्तम्।

।। इति वार्ता: ।।